विदुरं तूर्णमाराद्यायान्तं समसत्त्वः स राजा। अथाब्रवीत् भ्रातरं भीमसेनं किं नु क्षत्ता वक्ष्यते न समेत्य ?” भा० व० ५ अ०। द्वाःस्थे। “तत्रोद्वास्थः प्रविश्यैवेत्युपक्रमे “ततो हृष्टो मत्स्यराजः क्षत्तार-मिदमब्रवीत्” “क्षत्तारं कुरुराजस्य शनैः कर्णमुपा-जपत्” इति च भा०वि०६ अ०। सारथौ “जानश्रुतिर्ह पौत्रायण उपशुश्राव स ह संजिहान एव क्षत्तार-मुवाच” “स ह क्षत्तान्विष्य नाविदमिति” “स ह क्षत्ता-ऽविदमिति” च छा० उप०। दकोषाध्यक्षे च “अथ क्षत्ता पालागलीमभिमेयति” शत० ब्रा० १३।५।२।८ “क्षत्ता सन्निधितः कोषाध्यक्षः” भा०

क्षत्र पुंन०। क्षतस्त्रायते त्रै—क ५ त० क्षद-संभृतौ कर्त्तरि त्र वा अर्द्धर्चा०। १क्षत्रिये “यस्य ब्रह्म च क्षत्रं च उभे भवति ओदनः” श्रुतिः “यत्र ब्रह्म च क्षत्त्रञ्च सम्यञ्चौ चरतः सह” यजु० २०।२५। “क्षत्रं क्षतयजातिः” वेददी० “क्षतात् किल त्रायते इत्युग्रः क्षत्रस्य शब्दो भुवनेषु रूढः” रघुः। अत्र मल्लि० “क्षणु हिंसायामिति धातोः सम्पदादित्वात् क्विप् गमादीनामिति वक्तव्यादनुनासिकलोपे तुगागमे च क्षदिति रूपं सिद्धम् क्षतः नाशात् त्रायते इति क्षत्त्रः सुपीति योगविभागात् कः। तामेतां व्युत्पत्तिं कवि-रर्थतोऽनुक्रामति क्षतादित्यादिना। उदग्रः उन्नतः क्षत्त्रस्य वर्णस्य वाचकः शब्दः क्षत्रशब्द इत्यर्थः क्षतात् त्रायते इति व्युत्पत्त्या भुवनेषु रूढः किल प्रसिद्धः खलु नाश्वकर्णादिवत् केवलरूढः किन्तु पङ्कजा-दिवत् योगरूढः”। “नाब्रह्म क्षत्रमृध्नोति नाक्षत्रं ब्रह्म वर्द्धते। ब्रह्म क्षत्रञ्च संयुक्तमिहामुत्र च वर्द्धते” मनुः। क्षद्यते संभ्रियते राज्ञा, क्षद-कर्म्मणि त्र। २राष्ट्रे “क्षत्त्रं वा एष प्रपद्यते योराष्ट्रं प्रपद्यते क्षत्त्रं राष्ट्रम्” शत० ब्रा० ।२२। क्षत्रस्य कर्म्म अण्। तत्कर्म्मणि, “क्षात्त्रं द्विजत्वञ्च परस्परार्थम्” भट्टिः तस्येदमण्। क्षात्त्र तत्सम्बन्धिनि त्रि० “क्षात्त्रं कर्म्म स्वभावजम्” गीता ३उदके ४धने च निघ० ५देहे उणादिको० ६तगरे न० राजनि०

क्षत्रकर्म्मन् न० ६त०। “शौर्य्यं तेजोधृतिर्दाक्ष्यम् युद्धे चा-प्यपलायनम्। दानमीश्वरभावश्च क्षत्रकर्म्म स्वभावजम्” गीतोक्ते कर्म्मभेदे। अत्र क्षात्त्रं कर्म्मेति वा पाठः

क्षत्रधर्म्म पु० ६त०। स्मृत्याद्युक्ते क्षत्त्रियस्य धर्म्मभेदे। यथाह हारीतः

“राज्यस्थः क्षत्त्रियश्चापि प्रजा धर्म्मेण पालयन्। कुर्य्या-दध्ययनं सम्यग्यजेद्यज्ञान् यथाविधि। दद्याद्दानं द्वि-जातिभ्योधर्म्मबुद्धिसमन्वितः। स्वभार्य्यानिरतो नित्यं षड्भागार्हः सदा नृपः। नीतिशास्त्रार्थकुशलः सन्धि-विग्रहतत्त्ववित्। देवब्राह्मणभक्तश्च पितृकार्य्यपरस्तथा। धर्म्मेण यजनं कार्य्यमधर्म्मपरिवर्ज्जनम्। उत्तमां गति-माप्नोति क्षत्त्रियोऽप्येवमाचरन्”।

“त्रीणि राजन्यस्याध्ययनं शस्त्रेण च प्रजापालनं स्वधर्मस्तेन जीवेत्” वशिष्ठः। पद्मपु० स्वर्गखण्डे २६अ० “क्षत्त्रियस्यापि यो धर्म्मस्तं ते वक्ष्यामि पार्थिव !। द-द्याद्राजा न याचेत यजेत न च याजयेत्। नाध्याप-येदधीयीत प्रजाश्च परिपालयेत्। नित्योद्युक्तो दस्यु-वधे रणे कुर्य्यात् पराक्रमम्। ये तु क्रतुभिरीजानाः श्रुत-वन्तश्च पार्थिवाः। ये तु युद्धे विजेतारस्ते तु लोक-जितो नृपाः। अविक्षतशरीरो हि संगराद्यो निव-र्त्तते। क्षत्त्रियस्य तु तत् कर्म्म नोभयत्र यशःप्रदम्। क्ष-त्त्रियाणामयं धर्म्मो निर्णीतो मुनिभिः परः। नास्य कृत्यतमं किञ्चिद्राज्ञो दस्युविनिग्रहात्। दानमध्ययनं यज्ञो राज्ञां श्रेयोऽभिधीयते। तस्माद्राज्ञा महाराज ! योद्धव्यं धर्म्मशीलिना। प्रजाः स्वेषु च धर्म्मेषु स्था-पयेत महीपतिः। धर्म्मार्गेष्वेव हि कर्म्माणि कारयेत् स्वाःतं प्रजाः। परां सिद्धिमाप्नोति नृपतिः परिपाल-नात्। कुर्य्यादन्यन्न वा कुर्य्यान्मैत्रो राजन्य उच्यते। राजन्यानां करादानं विना वैवाहिकञ्च यः। प्रतिग्रहः स निन्द्योऽत्र परत्र चासुखप्रदः। युद्धे पलायनञ्चैव तथा कातरताऽपि च। अपालनं प्रजानाञ्च दाने धर्म्मे विर-क्तता। अनवेक्षा स्वराष्ट्रस्य ब्राह्मणानामनादरः। अमा-त्यानामसम्मानस्तेषां कर्म्मानवेक्षणम्। भृत्यानाञ्च परी-हासो निषिद्धं क्षत्रजन्मनाम्। राजन्स्तु महाराज ! यथा क्षेममवाप्नुयात्। तत् शृणुष्व नवाख्यास्ये धर्म्मसं-ग्रहतत्परः। वेदानधीत्य धर्म्मेण राजशास्त्राणि चा-नघ !। सन्तानादीनि कर्म्माणि कृत्वा सोमं निषेव्य च। पालयित्वा प्रजाः सर्व्वा धर्म्मेण जयतां पर। राजसू-याश्वमेधादीन् मखानन्यांस्तथैव च। आहृत्य च यथा पाठं विप्रेभ्यो दत्तदक्षिणः। संग्रामे विजयं प्राप्य तथाल्पं यदि वा बहु। स्थापयित्वा प्रजापालं पुत्त्रं राज्ये च पार्थिवः। अन्यगोत्रं प्रशस्तं वा क्षत्त्रियं क्षत्त्रियर्षभ !। अर्च्चयित्वा पितॄन् सम्यक् प्रितुयज्ञ्ये यथा-